श्रीसीतारामोजयति शौनकउवाच श्रीरामस्यायुधानांनोमहात्म्यंमुनिदुर्ल्लभं विस्त
राद्ब्रूहिभोसूतसर्वोत्कृष्टतमंमहत् १ सूतउवाच एकदातपसादीप्तंचैकांतेसंस्थितंमु
नि व्यासंगत्वाचनत्वाचप्रपच्छेदयुधिष्ठिरः २ युधिष्ठिरउवाच मुनेश्रीरामचंद्रस्यवेदगु
ह्यंपुरातनं परत्वंचापबाणानांवदमेक्षेमकृन्नृणां ३ श्रीवेदव्यासउवाच सीतांसीताप
तिंचैवहनुमंतंगुरुंतथा धनुर्बाणपरत्वंवैनत्वावक्ष्याम्यनुत्तमं ४ परात्परतमोदेवःप
रात्परतमःप्रभुः परात्परतमंतत्वंरामोब्रह्मपरात्परं ५ तस्यांशाःसगुणाःप्रोक्ताब्रह्माविष्णु
शिवादयः निर्गुणानैककार्य्यार्थंवासुदेवादयःस्मृताः ६ धनुर्बाणधरोदेवोद्विभु
जोरघुनंदनः सर्वादिःसच्चिदानंदोनित्यःसर्वविनायकः ७ तस्यचिन्हधराःसर्वेतदा
ज्ञापरिपालकाः स्थापिताविधिवत्तेनयथावत्तान्पुनःशृणु ८ देवासुरनराश्चैवतस्य
मुख्याधिकारिणः अन्येक्वचिद्भव्याज्ञातव्यास्तदनुग्रहात् ९ शरचापधराःसर्वे

क्वचित् १

श्रीरामस्यानुसारतः बभूवुर्द्विभुजाः पूर्वे दयाधर्मपरायणाः १० तेषां बहुभुजाः केचि
त्तद्भुजाद्विभुजांतराः शस्त्राणि त्वयि चान्यानि धनुर्बाणाश्रितानि वै ११ तद्वै विलक्ष
णं भावं प्रकृत्या चित्रितांगते वृद्धिर्हि लोकवृद्धित्वात्स्वकर्मणा हरीच्छया १२ कामो रा
माद्धि संजज्ञे चापबाणधरः प्रभुः प्रजास्तस्मात्द्विभुजात्तु समुत्पन्नास्त्वनेकधाः १३ कालो
रामस्य कोदंडं शरासंवत्सरादयः मृगान्वै विमुखांल्लोकान्मारयंति तदाज्ञया १४ का
मोपि रामविमुखान्सिद्धान्दुःखप्रदायकः अन्यथा रामभक्तेन शिवेन भस्मतां गतः
१५ त्रिशूलमधिकं कृत्वा स्वपिनाकं च शंकरः कदाचित्त्यक्तवान्तस्माद्रामचंद्रेण खं
डितं १६ भूमौ कृतावतारेण सीतायाश्च प्रयोजनात् एवं गर्वप्रहारी च राघवो भक्तव
त्सलः १७ चक्रसुदर्शनं चापि प्रेम्णा नारायणस्य वै गर्वं दधार हृदये आयुधानामहं
वरं १८ तत्सहस्रार्जुनं कृत्वा भार्गवद्वारमर्दितं प्रगृह्य वैष्णवं चापं रामस्याप्यदहन्म
दं १९ सर्वोत्कृष्टतमा ह्येवं रामस्य चापशायकाः तेषां प्रभावमतुलं वक्तुं शक्तो न

नागएट २० सेवंते सर्वकालेषु शस्त्राण्यस्त्राणि राघवं तथापि तस्य तेषां वै चापवा
२ णामहाप्रियाः २१ अस्त्रं ब्राह्म्यं च शैवं च तथा नारायणास्त्रकं इत्यादीनां प्रयोगाय
ते वाणाग्रे भवंत्युत २२ ब्रह्मापि ब्राह्मणैः पूज्यो राममार्गानुसारतः चापवाणयुतो
विद्वान् तस्य वक्ष्यामि लक्षणं २३ चापाकारं सदा स्वांगे सूत्रं यज्ञोपवीतकं यो धारय
ति धर्मज्ञो वाणान् वाणीमयान् शुभान् २४ तैर्नाशयति लोकानामज्ञानं ज्ञानवैरिणं
एवं हि ब्राह्मणाः सर्वे चापवाणयुता भुवि २५ सूक्ष्मचिन्हैर्जगत्पूज्याः प्रियाः श्रीजान
कीपतेः क्षत्रियास्तु प्रसिद्धा वै धनुर्वाणैरलंकृताः २६ चक्रचिन्हधराहस्ते बभूवुर्ये नृपो
त्तमाः ते पि जयं श्रियं कीर्तिं प्राप्ताश्चापशरैरिह २७ ब्रह्मक्षत्रानुगाश्चान्ये वैश्याः शूद्रा
दयः स्मृताः स्त्रियो दृष्टिमयान् वाणान् भ्रूचापं धारयंत्युत २८ स्वकांतहृदयं लक्ष्यं
कृत्वा सत्पुत्रतां गताः एवं चिन्हयुता लोकाः स्वधर्मनिरता हरिं स्मृत्वा च परमां सिद्धिं
प्राप्नुवंतो युगे युगे २९ धारयति घनश्चापि वर्षाकाले महद्धनुः इंद्रोपेंद्रयमाद्याश्च

प्रथमं वै धनुर्द्धराः ३० इति साधारणं धर्मं वर्णितं वै मया शुभं ईश्वरेषु च जीवेषु परेशस्यानुसा
रतः ३१ उत्तमं चिन्हजं धर्ममिदानीं शृणु भारत येन श्रीजानकीरामौ शीघ्रमेव प्रसीदतः ३२
नामानि चिन्हानि रघूत्तमस्य तथा चरित्राण्यपि पावनानि शृण्वंति गायंति च धारयंति ते
वै भवंति त्रिदशेशपूज्याः ३३ भवहरा वरचापशरा हरेः प्रणतपालनधर्मधुरंधराः श्रुतिग
णैः कृततत्त्वपरात्पराः सकलशास्त्रपराक्रमशागराः ३४ इति श्रीशनत्कुमारसंहितायां श्रीव्या
सयुधिष्ठिरसंवादे श्रीरामधनुर्बाणपरत्वे प्रथमोध्यायः १ श्रीवेदव्यास उवाच एकदा सर्व
वैकुंठैः पूज्ये धाम्नि परात्परे राजाधिराजरूपेण रत्नसिंहासने स्थितं १ चिद्रूपायां शुभायां
तु चिदानंदं परात्परं चिदानंदमयैः सर्वैः राजचिन्हैरलंकृतं २ शाकेते रामचंद्रं वै सीतया भ्रा
तृभिर्युतं अनेकैः पार्षदैः सिद्धैर्दिव्यैर्हनुमदादिभिः ३ सेव्यमानं परं ब्रह्म वसिष्ठादिभिर
न्वितं तमत्स्याद्यवतारैश्च पूजितं परमेश्वरं ४ नारायणमहाविष्णुवासुदेवादिभिः स्तुतं
सर्वाभिः शक्तिभिश्चैव महाशंभुनिसेवितं ५ व्याप्तं सर्वास्त्रशस्त्रैश्च धनुर्बाणधरं हरिं सर्वशा

३

स्त्रैः सहावेदाः स्तुतिं चक्रुरनेकधाः ६ तदा तेषां समुद्भूतं वाक्यं नानार्थबृंहितं देवो भूत्वा तु दे
वं वै यजेच्च पुरुषर्षभः ७ तच्छ्रुत्वा श्रीमहाराजः शंभो मध्ये ब्रवीद्वचः एतस्यार्थं हि भो शंभ्याव
र्णयंतु पृथक् पृथक् ८ सीतोवाच स्वदेवस्य तवांद्वागंधराम्यहं एवं तु त्वन्मयी भूत्वा त्वां भजामी
ति मे मतिः ९ वासुदेवादयश्चोचुर्वयं देवा यजामहे त्वां देवं त्वन्मया भूत्वा भेदं त्यक्त्वा त्विति श्रुतिः
१० उवाच च महाशंभुर्हृद्गतं त्वां भजाम्यहं देवं देवः कृपासिंधो देहो भूत्वा तु देहिनं ११ उवाच
भरतो देवं देवो भूत्वा यजाम्यहं प्रेम्णैकत्वेन वाक्यार्थो भृत्येपि न विरुद्धमान् १२ उवाच ल
क्ष्मणस्त्वां वै नित्यकैंकर्य्यकर्मणा यजामि शुद्धस्त्वद्योज्ञो भूत्वा श्रुतीति मे मतिः १३ उवा
च तत्र शत्रुघ्नस्त्वत्समो भरतो जनः तस्य योग्यः कदाचिद्वै भूत्वाहं तं भजे प्रभो १४ दासोहं स
र्वकार्य्येषु तव योग्यः कृपानिधे भूत्वा भजामि देवं त्वामुवाच हनुमानिति १५ उवाचेदं व
सिष्ठोपि माधुर्य्येहं गुरुस्त्वव ऐश्वर्ये च लघुत्वेन यथावत्त्वां भजे हरिं १६ उचुस्तं पार्षदाके

३

चित्वद्योग्याश्चत्वदिच्छया शृंगारशांतशाख्यादिभावतस्त्वांभजामहे १७ ऊचुस्तदाधनुर्वी
घू२ णारोषंकृत्वारत्नमं श्रुत्यर्थंतुवयंविद्मः शृणुनाथयथार्थतः १८ हृदंतरस्यचिन्हानिकथि
तानिमहात्मभिः तत्रापिबाह्यचिन्हानिप्रधानानिकुरुप्रभो १९ लोकेवेदेचमर्य्यादात्वत्तः
सिद्धाभविष्यति चिन्हानिभुजयोरस्मत्रामनामयुतानिवै २० त्वद्वाक्याद्धारयिष्यंतिसर्वेनारा
यणादयः एवंदेवसमोभूत्वायजेद्देवमनन्यधीः २१ वयंचापिभविष्यामरामनामयुताःस
दा एवंश्रुत्वाब्रवीत्सीतामच्चिन्हानिविनाकथं २२ कार्य्यसिद्धिंगमिष्यंतिह्येकोरामोद्विधांग
तः चंद्रिकांमुद्रिकांनामभालेगृह्णंतुमेविभो २३ तच्छ्रुत्वोवाचरामस्तुशभायांनभवेदि
दं एवंकार्य्यंमहादेविभवतुराशमंडले २४ अत्रापिननिषेध्यंतत्भवेच्चनभविष्यिये दासी
त्वंचैवदासत्वंग्रहीष्यंतिजनाःप्रिये २५ त्वयिमयिचचार्वंगिराशंचैवशभांप्रति तदंत
रेरशाःपंचसिद्धाःसर्वत्रदेहिनां २६ तदोवाचमहाविद्वान्हनुमान्रामवल्लभः स्वामिनंस
र्वलोकानांवचनंसर्वसंमतं २७ पादाकृतिंललाटेस्वेप्रभोत्वत्पादरेणुकां सर्वेपिधारयि

श्रीसीतारामज्

ष्यंतिसीतारेखातदंतरे २८ एतत्सीतामतंज्ञात्वाममापिकथितंमया तेनसिद्धश्चसर्वेषांदास
४ भावोभविष्यति २९ अन्यथागर्वकृद्धर्मंमन्येहंदीनवत्सल तदोवाचरामचंद्रस्सुलक्षीमम
३० मालातस्याःस्वकंठेवैधारयंतुममाज्ञया मंत्रंषडक्षरंविद्यंसर्वेग्रह्णंतिआदितः ३१ अ
द्यप्रभृतिचिन्हानिह्येतानितुसदामम श्रुत्वावाक्यंप्रभोरेतत्प्रसन्नास्तुशभाजनाः ३२ ऊचु
श्चनत्वाहरिपादपंकजंवयंकृतार्थावचनानिश्रुत्वा शुभानितेनाथमुखारविंदात्परात्पर
स्त्वंपुरुषोत्तमोसि ३३ इतिश्रीशनत्कुमारसंहितायांश्रीव्यासयुधिष्ठिरसंवादेश्रीरामध
नुर्वाणपरत्वेद्वितीयोध्यायः २ श्रीवेदव्यासउवाच शृणुराजन्कथांदिव्यांसर्वलोकम
लापहं तदावसिष्ठोवाचवचनंराघवंप्रति १ वयंत्वत्पार्षदादिव्यानानारूपधरावि
भो त्वन्मनस्कास्त्वदाज्ञायांसततंलीलयास्थिताः २ गुरुत्वंयदिमेदत्तंत्वयासर्वे
श्वरेणवै ततोहंप्रार्थनांकुर्यामिमंकार्यंप्रतिप्रभो ३ गुरुद्वारेणकर्तव्याःसंस्काराः
सुंदरास्त्विमे उवाचरामचंद्रस्तुतथेतित्वंपुनःशृणु ४ मत्तःसर्वगुरुत्वाद्धिदीक्षेयं ४
वैप्रवर्त्ततु ततःसीताभवत्शिष्यारामस्यधर्मचारिणी ५ तस्याशिष्यामहाशंभुवा

सुदेवादयस्तथा अभवद्धनुवान् शिष्यो महाशंभोस्तदावली ६ महाशंभोश्च शिष्यो हि वशि
ष्ठोप्यभवत् द्विजः पार्षदानामनंतानां केचित् छिष्याहनूमतः ७ अन्येवशिष्ठशिष्यास्तु बभू
वुर्विधिना क्रमात् सतस्थाने शीतला मुद्रा दिव्यैर्गंधैः प्रवर्त्तिताः ८ एवं माला च मुद्रा च तिलकं
मंत्र एव च समानाश्चैव सर्वेषां नाम गाथा विलक्षणा ९ वर्णयामि महापुण्यां महापापप्रणा
शिनिं यथा मंत्रं हि गृह्णंति तत्र सर्वे ह्यनादितः १० नामानि रामसंबंधात् तथैव पूर्वतः क्रमात्
तत्समये पुनस्तानि धृतानि यानि मे शृणु ११ रामनामार्थतः सीतानामसिद्धं भवेत्प्रभुं एवं
रामः स्वभार्य्यायै सीतानाम प्रदत्तवान् १२ रामस्यैवान्यनामानि वासुदेवादयः क्रमात् त
दा पुनर्धृतान्येव तानि वक्ष्यामि हर्षतः १३ रामः शनातनो विष्णुर्महाविष्णुस्तथैव सः
रामः शनातनः शंभुर्महाशंभुस्तथैव सः १४ रामः शनातनः कृष्णो वासुदेवस्तथैव सः
आदिर्नारायणो रामो नृसिंहस्तु तथैव सः १५ एवं स्वस्यैव नामानि तेभ्यो दत्तानि सीत
या रामं नाम महादिव्यं स्वभर्त्तुः सा न दत्तवान् १६ कथंचिद्भार्गवः प्राप्य महाशंभुमुखे

नवै किंचिद्दधार गर्वं वै त्वन्येषां मध्यगो हठात् १७ तद्गर्वं राघवो ज्ञात्वा गर्वहारी जनार्दनः
५ कुपितोप्यसहत्स्वामी स्वागसं क्षमया स्वया १८ अद्य शृणु महाभाग पार्षदानां कथां शुभां
दत्तानि गुरुणा तेभ्यो नामानि चार्थतो हरेः १९ एवं स कारयामास विधानं सर्वतो हरिः त
दा प्रभृति तत्स्थाने पंचचिह्नैरलंकृता २० सर्वे प्रवेशयामासुश्चान्यैनैव कदाचन ।
एवं बहुगते काले ह्येकदा राम संसदि २१ महत्वं शरचापाणां दृष्ट्वा सर्वे तमोत्तमं चक्रं
सुदर्शनं नाम व्यथां प्राप्य त्वघोपतत् २२ तदा नारायणः प्रेम्णा तच्चक्रं स्वैश्चतुर्भुजैः ।
सर्वैरुत्थापयामास राघवं चेदमब्रवीत् २३ अस्यार्थं जगतां नाथं त्वां प्रार्थयाम्यहं दुः
खं हरस्व चक्रस्य दयासिंधुस्त्वमेव हि २४ तस्य वाक्यं वरं श्रुत्वा श्रीरामो दीनवत्सलः
अब्रवीद्धर्षयन् शम्भान् शृणु स्ववचनं मम २५ त्वं नारायण वैकुंठे ह्यस्यांशं धारयन् स
दा चक्रं च गदया शार्ङ्गं पूज्यं कुरु ममाज्ञया २६ यथात्रयं च संस्कारास्तथा तत्र भवंतु ते
वाढमित्येव तच्छ्रुत्वा हृष्टो नारायणोब्रवीत् २७ भवभयहरमेतच्चापबाणोत्थध ५

र्मधनसुतसुखमायुश्रोतॄणांसंप्रदाता २८ सकलसुनरनार्य्यरस्यदिव्यस्यभूमौगुरुकृतमधिका
रंसर्वकालेषुयोग्याः २९ इतिश्रीशनत्कुमारसंहितायांश्रीव्यासयुधिष्ठिरसंवादेश्रीरामधनुर्वा
णपरत्वेतृतियोध्यायः ३ युधिष्ठिरउवाच महात्म्यंचापबाणानांश्रुत्वातृप्तंनमेमनः वेदव्या
समहादिव्यंपुनर्वदमहामुने १ श्रीवेदव्यासउवाच श्रीरामेणवरंदत्तंश्रुत्वाचक्रायसत्तमं।
सीताचापशरैःसर्वेकिंचिद्वैक्लव्यतांययुः २ हृष्टंनारायणंदृष्ट्वापुनःरामोब्रवीद्वच नारायणप्र
पन्नानांकेचिच्चापशरानपि ललाटेधारयिष्यंतिवैकुंठेवचनान्मम ममचापशराणांवैचांशां
शान्चापशायकान् ४ संग्रामेधारयिष्यंतिसर्वेदेवासुरानराः इतिवाक्यात्शभामध्येबभू
वसर्वतःसुखं ५ ततःकिंचिद्गतेकालेतत्शभायांचराघवं समीपेह्यागताःसर्वेपंचसंस्कार
संयुताः ६ तेषांमध्येमहाशंभुःस्वस्यवामभुजेतदा कृत्वाप्रतिंचपाहीनंचापचिन्हंयदावि
शन् ७ अनंतरंचतस्यैकप्रागतोभार्गवस्तथा रामनामविनाधृत्वाबाणचिन्हंभुजेवरे ८
तौदृष्ट्वारुषिताःसर्वेरामचापशरैर्युताः प्राहुस्तौकिमिदंकर्मनयोग्यंरामसंसदि ९ महा

६

शंभुरुवाचेदं मजानन्सन्मयाकृतं भार्गवोप्याहगर्वेणरामोहंनामचिन्हवान् १० तदातेकुपिताः
सर्वेमंत्रंकृत्वाशभाजना अब्रुवन्राजराजेन्द्रंमर्य्यादातेविनाशिता ११ वयमपिकरीष्याम
यदिदंडंनदास्यसि इतिश्रुत्वामहाराजोमुहूर्तंचिंतयन्प्रभुः १२ कृत्वाविवाहलीलांचवभंजवै
शराशनं महाशंभोःकरेवामेस्वचापस्यापराधतः १३ तेजोजहारविश्वात्माभार्गवस्यापिस
र्वशः तांलीलांललितांदेवःसमाप्यपुनरेकदा १४ शंभ्वान्सर्वान्शंभोःकृत्वाआजुहाव
जगत्पतिः तानागतान्ससत्कृत्यकृतवान्मंत्रमुत्तमं १५ उवाचमतमाज्ञायसर्वेषांसीत
यासह धारयस्वमहाशंभोस्वभालेसर्वदाकिल १६ ममचापंशराभ्यांवैचिन्हरूपंममा
ज्ञया त्यक्त्वाप्रतिंचापरमांत्रिपुंड्रंतिलकंतुतत् १७ तमुवाचमहाशंभुरूर्ध्वपुंड्रस्यकागतिः
रामस्तमाहनिश्चित्यसर्वायसमयंकरे १८ त्रिशूलंतिलकाकारंचाद्यप्रभृतिधारयत
द्भविष्यतितेशस्त्रंपिनाकंनाशितंमया १९ तथेत्युक्त्वामहाशंभुस्तत्कार्य्यंकृतवा
न्भवः एवंचापशराणांवैमहत्वंजानकीपतेः २० सर्वपापहरंसत्यंविद्धिराजन्युधि

६

ष्टिर युधिष्ठिरउवाच यशः श्रीरामचापस्यसहस्रामृततोधिकं २१ अन्यच्चश्रोतुमि
च्छामिमुनेशाकेतसंभवं श्रीवेदव्यासउवाच कदाचिद्वासुदेवस्यशंकर्षणः सुपार्षदः
नारायणमुवाचेदंशीघ्रंयामसभांप्रति २२ सोप्याहचापचिन्हंवैमयाद्यनधृतंभुजे त
दाशंकर्षणंप्राहदोषेहंतेसहायवान् २३ एवंतौसमयंकृत्वासभायामागतोहरेः तदा
नारायणःश्रेष्ठमाशनंनैवप्राप्तवान् २४ प्राहुःसभ्याश्चचिन्हंतेकथंनैवकृतंत्वयासो
प्याहममदोषःस्यादयंशंकर्षणोनवै २५ तच्छ्रुत्वाभगवान्रामःसभ्यान्पृष्ट्वाब्रवी
द्वचः आशनंसर्परूपेणत्वयंचास्यभवेन्महान् २६ शीघ्रमदर्शनाह्लादाल्लोकपूज्यो
भविष्यति श्रीवेदव्यासउवाच एवंनारायणस्यैवसोभूत्सर्पासनंनृप २७ वासुदेवस्य
शेषत्वात्छेषोसहस्रमस्तकः तौदृष्ट्वालक्ष्मणोधीमान्ब्रवीद्राघवंप्रति २८ इत्थं
कथं३ भूतःकृपानाथंत्वांधारयाम्यहं एतच्छ्रुत्वावरंतस्मैप्रादाद्रामोवरप्रदः २९ आवांवैवि
श्वशर्मार्थंलीलामीदृग्विधांवरां पाप्रकल्पेकरिष्यावस्वांशरूपेणलक्ष्मण ३० श्री
वेदव्यासउवाच । इयंगाथामयाप्रोक्ताराजंस्तेमंगलप्रदा चापमहात्म्यसंयुक्ताभूयः

किंश्रोतुमिच्छसि ३१ युधिष्ठिरउवाच धृत्वाधर्ममिदंश्रेष्ठं सर्वेनारायणादयः ३२ किं
फलंप्राप्नुयुस्तत्रब्रूहिव्यासमहामते श्रीवेदव्यासउवाच एकदातुदयांकृत्वादयापूर्णावि
देहजा ३३ पतिमुवाचभोस्वामिन्येभ्योदेहिवरंशुभं आदितस्तेकृपापूर्णाश्चाद्यकिंफ
लमुत्तमं ३४ तदोवाचकृतज्ञश्चसर्वज्ञःसर्वकामदः मर्त्यलोकेनृलीलार्थंलोकोद्धा
रार्थमेवच ३५ अहंप्रादुर्भविष्यामिभ्रातृभिःसीतयासह कालेनारायणद्वाराद्ब्रह्मणाप्रा
र्थितःप्रभुः ३६ तदानुधावदिष्यंतिमांवैनारायणांशकं केचिन्नारायणःसाक्षात्वासु
देवंचकेचन ३७ एवंविष्णुंमहाविष्णुंकृष्णंकेचित्परात्परं तदाममगुणैर्दिव्यैःकीर्त्तिं
प्राप्स्यंतितेपरां ३८ शंभोरंशंशिवंतत्रपूजयिष्यामिपूजितः अन्यान्भक्तान्हिसर्वांश्च
त्यक्त्वाहंकारमेवच ३९ सुखंदास्यामिदेवेशावरमेतन्मनुत्तमं इतिश्रुत्वाप्रभोर्वाक्यंप्राप्नु
युःपरमंसुखं ४० पुनस्तेषांप्रसन्नःसन्श्रीरामःकमलेक्षणः वेदान्प्रत्याहवेदा
त्मापूपंवैजगतीतले ४१ ख्यातंकुरुध्वमुत्कर्षंनानाग्रंथैर्युताभृशं एतेषांपरमावेन
मत्समंसुखदायकं ४२ श्रुत्वातद्वचनंसांगावभूवुर्व्यथितास्ततः रामस्तेषांव्यथांपृष्ट्वाद

त्तवान्वरमुत्तमं ४३ एवं महत्त्वं महतामपारं चित्रं विचित्रं हि महायुधानां कोवा कविर्देह
भृतां वरीष्ठः पारं लभेद्यो जगतीतले वै ४४ इति श्रीशनत्कुमारसंहितायां श्रीव्यासयुधिष्ठि
रसंवादे श्रीरामधनुर्बाणपरत्वे चतुर्थोध्यायः ४ युधिष्ठिर उवाच काव्यथा किं वरं रामा
त्वेदानां च बभूव ह वक्तुं योग्योसि मे व्यास ह्यनुग्राह्योस्म्यहं त्वया १ श्रीवेदव्यास उवाच ॥
यथा परात्परो रामस्तथा वेदाः परात्पराः यथावतारा रामस्य वासुदेवादयस्तथा २ वेदावता
रास्तेषां वै स्थाने स्थाने स्थिताः सदा रामस्वाससमुत्पन्ना यथा वेदाः परात्पराः ३ तेषां स्वास
समुत्पन्नास्तथैव ते पराः स्मृताः एवं परं परा तेषां ज्ञातव्या वै सनातना ४ तेषां चिंतासमुद्भूता
वदिष्यामः कथं वयं सर्वान्परत्वभावेन प्रत्येकं वै पृथक् पृथक् ५ इति ज्ञात्वा तदा तेभ्यो
रामचंद्रो वरं ददौ युष्मदंशांशसमुद्भूता वेदा ब्रह्मांडगोलके ६ भविष्यंति विगूढार्था नाना
तत्वप्रकाशकाः यस्य यस्य च देवस्य ये ये तत्राप्युपाशकाः ७ तेषां वेदाः प्रदास्यंति तत्वं
स्वेष्टस्य सुंदरं एवं रामो वरं दत्वा व्यथां दृष्ट्वा पुनर्वरं ८ ददौ तेभ्यः कृपां कृत्वा मत्तो राजन्शृ

णुष्वतत् सर्वांतर्यामिणं मां वै ज्ञात्वा यूयं परात्परं ९ अन्यान्देवान्स्तुवंतस्तु न
८ दोषं लप्स्यथ क्वचित् मद्भक्तानां यथार्थं वै मत्तत्वं दृष्टिगोचरं १० भविष्यति विनाषे
दमन्यानां च श्रमेण वै ददाम्यन्यं वरं दिव्यं युष्मभ्यं श्रेयसां प्रदं ११ यथा ममावतारो
हि भविष्यति भुवः स्थले यूयं रामायणं भूत्वा तथैव सुखमाप्स्यथ १२ एवं श्रुत्वा शुभं
वाक्यं वेदा रुचुर्हरिं तदा अपारं ते चरित्रं वै नानारामाणैः प्रभो १३ भविष्यति त्रिलोके
षु ख्यातं परमसुंदरं नानामुनिगणद्वारैर्महापातकनाशनं १४ त्वद्भक्तास्तेन तुष्यं
ति त्वन्यभक्ता न कर्हिचित् तथा तव गुणाधिक्यात् तत्तत्वं सर्वोत्तमं १५ भविष्यति
महाराज प्रख्यातं वेदवादिषु तथापि शरचापाणां चिन्हानि गुरुदीक्षया १६ वर्ण
यामकथं नाथ येन वै सफलावयं श्रुत्वा वाक्यं तु वेदानामुवाच वरदेश्वरः १७ ऋ
चा वृद्धिर्हि युष्माकं मत्प्रसादाद्भविष्यति महादिव्यतरागोप्या मम सामीप्यदायिनी
१८ तथा रहस्यग्रंथेषु संहिता सा मुनीश्वराः वसिष्ठागस्त्यव्यासाद्याः शकाद्यास्तु त ८

माः १९ वदिष्यंतिमिमंधर्मंमहामंगलदायकं शारदास्थास्यतितेषांहृदिमध्येम
माज्ञया २० एवमुक्त्वाततस्तेभ्योदीक्षांसंस्कारसंयुतां श्रीरामःकारयामासगु
रुणापरशंभुना २१ मालयावाणयोश्चिन्हंचनुश्चिन्हंमनोहरं खड्गचिन्हंचर्म
चिन्हंचक्रचिन्हंतथाकृतं २२ तिलकंचोर्ध्वपुंड्रंवैसीतायाबिंदुसंयुतं चिन्हंरामेति
नाम्नश्चवामस्कंधेविभिन्नकं २३ कृत्वागुरुर्महाशंभुर्वेदानामाज्ञयाप्रभोः ब्रह्मना
मसमस्तानामृग्यजुरादिभिन्नकं २४ दत्तवान्रामचंद्रस्यप्रसिद्धंवैपुरातनं मंत्रं
षडक्षरंदिव्यंतारकंतुपरात्परं २५ ततोवेदाःप्रसन्नास्तुस्वदेहेचस्वपुस्तके प्र
त्यक्ष्यंदर्शयामासुश्चिन्हानिरामसंसदि २६ तदारामोमुदंप्राप्यदत्तवान्वरमुत्तमं
यूयमेतानिचिन्हानिधारयंतुयुगेयुगे २७ प्रत्यक्षंसर्वलोकेषुस्वदेहेपुस्तकेतथा यु
धिष्ठिरउवाच अहोव्यासमहाविज्ञआश्चर्यंपरमंमम २८ कथंतेधारयामासुःपुस्त
केपियुगेयुगे सूतउवाच युधिष्ठिरवचःश्रुत्वाचानयित्वास्वपुस्तकं २९ पत्रेपत्रे

तुचिह्नानिदर्शयामासभूपतिं पत्रस्यदक्षिणेस्कंधेवेदइत्यक्षरद्वयं ३० वामेस्कंधेतुरामेति
८ भालेचप्रणवस्थितः तेषूदरंवकारस्यचिन्हंमालामयंशुभं ३१ मालाग्रेप्युर्ध्वरेखासाप्रतिं
चापृथग्स्थिता मालोपरिह्युभेरेखेतौरामस्यशरावुभौ ३२ दकारस्यकवंधोयेच्चापंहीनंप्र
तिंचया कवंधस्यशिरःखड्गंविशर्गवणयाम्यहं ३३ उर्ध्वबिंदुर्विशर्गस्यजानक्याश्चै
वबिंदुका अधोबिंदुर्हरेश्चक्रमितिव्यासोवदद्वचः ३४ रामेतिनामरामस्यचापबाणैःपृथ
क्स्थितं प्रणवस्याप्युकारोयःससिंहासनमद्भुतं ३५ तस्योपरिचयामात्रातिलकमुर्ध्वपुं
ड्रकं तन्मध्येबिंदुरूपेणसीतादेवीस्थितापरा ३६ अथवाह्युकाररूपेणसीतादेवीव्यवस्थि
ता तच्चंद्रिकाशिरोबिंदुरितिव्यासोब्रवीद्वच ३७ श्रीवेदव्यासउवाच विलक्षणानिवेदे
षुचिह्नानिधर्मपुत्रक नामतेषांतुसर्वेषामेकंब्रह्मगुरुकृतं ३८ भिन्नभिन्नानिनामानि
ऋगादीनिशुभानिच रामनाम्नश्चपर्य्यायंब्रह्मनामविदुर्बुधाः ३९ ऋगादीन्यन्यनामा
नितस्यगौणानितानिच एवंराजंश्चतुर्वेदाःपंचसंस्कारसंस्कृताः ४० प्रत्यक्षंरामचं ९

द्रस्यदीक्षयादीक्षिताः सदा रामरूपाराममक्तक्तारामकीर्तनतत्पराः ४१ तेषांचिन्हानिचा
चापिसंस्थितानिनवानिवैमूढालोकानजानंतितथापिपापकृत्तमाः ४२ वेदावैशरचापचिन्हनि
रताश्चिन्हानिगायंतिये श्रीरामस्यपरात्परस्यरशिकादेवर्षिभिः पूजिताः तेषांतत्ववरंविहा
यकुजनाग्रह्णंतिवैकल्पितान् तेपीच्छंतिसदैवलाभमतुलंत्वाश्चर्यमेतत्परं ४३ इतिश्रीश
नत्कुमारसंहितायांश्रीवेदव्यासयुधिष्ठिरसंवादेश्रीरामधनुर्वाणपरत्वेपंचमोध्यायः ५ यु
धिष्ठिरउवाच धनुर्वाणादिचिन्हानांदीक्षाश्रीगुरुणाकृता कथंभवतिलोकेस्मिन्वदमेकृ
पयामुने १ श्रीवेदव्यासउवाच त्रैत्रशुक्लनवम्यांवाकार्तिकीपूर्णिमादिने सीताजन्मदिने
चापिविवाहदिवसेशुभे २ राज्याविषेककालेवाश्रीरामविजयेदिने अन्येशुभेचकाले
वासुदीक्षांधारयेत्सुधीः ३ अयोध्यायांचित्रकूटेविदेहनगरेथवा रामधाम्नितथाचान्येय
द्वाश्रीराममंदिरे ४ सीतारामानन्यरतंवैष्णवगुरुदीक्षितं बुधंसर्वांगयुक्तंचकामक्रोधादि
वर्जितं ५ वर्णाश्रममनाशक्तंनिःपापंकारयेद्गुरुं शुद्धंशौचादिभिर्भूत्वागुरुंस्थाप्यशु

चस्थितोभवेत् ततोगुरुः शुभांवेदींकृत्वासर्वविधानतः ७ भ्रातृभिःसीतयाशार्द्धं ॥१॥

भाशने ६ सर्वमुपस्करंदद्यात्तदाज्ञांरामंसस्थाप्यपार्षदैः विघ्नेशंरामभक्तंचसत्कृत्यवेदशा
१० सनात् ८ मुख्यंचमारुतिंकृत्वापुनःसर्वांश्चपूजयेत् मंत्रैःसर्वोपचारैश्चयजेत्शिष्यह
स्ततः ९ होमंकृत्वाहुतिंदत्वाराममंत्रैश्चवेदवित् मुद्रांशरस्यचापस्यशुद्धधातुमयींत
दा १० वह्नौतप्त्वाचशिष्यस्यभुजयोर्दापयेद्गुरुः चिह्नमेकंतुचापस्यवामेचदक्षिणेत
था ११ शरचिह्नद्वयंकृत्वारामनामयुतंवरं ललाटेतिलकंदद्यादूर्ध्वंचश्वेतमृण्मयं १२
सिंहासनोपरिश्रेष्ठंद्विरेखंचरणाकृतिं स्थापयेज्जानकीरेखांतन्मध्येचहरिद्रया १३ तुलसी
मालिकासूक्ष्माकंवलग्नाद्विधाकृतिः दद्यात्तांक्षणमात्रेपिशिष्योनैवत्यजेत्पुन १४ श्री
रामतारकंमंत्रंकर्णेचश्रावयेद्गुरुः शिष्यंतुरामसंबंधीनाम्नावैप्रवदेत्पुनः १५ इतिशुभा
यांरामस्योपाशकस्यैवलक्षणं योराशोपाशकःशिष्यःशरवीत्वेनचवर्तते १६ तिलको
परितस्यैवस्थापयेच्चंद्रिकाधिकं मुद्रिकाबिंदुकावापिधारयेच्चयथारुचिः एवंलब्ध्वाचसं
स्कारान्शिष्योगुरुंप्रपूजयेत् वस्त्रैर्धनैःसुद्रव्यैश्चप्रेमाणाकृत्वाप्रक्षिणां १८ दंडवत्प्र १०

णतिं कृत्वा साष्टांगं वचनं वदेत् अहं दासोस्मि ते स्वामिन् प्रसन्नो भव सर्वदा १९ तदाना
नाविधं श्रेष्ठमासीर्वादं वदेद्गुरुः विशर्जनं च देवानां कृत्वा कार्यं समापयेत् २० शिष्य
स्तु भोजनं दद्यात् गुरवेषु विधं वरं सीतारामजनेभ्यश्च दक्षिणासहितं शुभं २१ उच्छिष्टं श्री
गुरोरेव तथा पादोदकं भजभे एवं श्रीरामधर्मस्य सर्वे वर्णाधिकारिणः २२ ब्राह्मणास्तु विशे
षेण स्त्रियश्चापि युधिष्ठिरः इमं सर्वोत्तमं धर्मं धारयंति च ये नराः २३ देवपूज्यास्तु ते ज्ञेयाः
श्रीरामस्यातिवल्लभाः सर्वैर्वैष्णवैर्विप्रैः पूज्याश्च पृथिवीतले २४ गच्छंति निश्चितं ते श्री
रामधामपरात्परं गच्छंति पितरस्तेषां वैकुंठं हरिसंनिधौ २५ ये नमंति बुधास्तान् वै ते क्रतार्था
स्तु निश्चितं निंदंति ते महामूढा भवंति प्रेतपन्नगाः २६ कुंभीपाके महाघोरे पतंति नरके मृ
ताः प्रायश्चित्तं तु तेषां वै न कदाचिद्भवेद्भुवि २७ इमं धर्मं महादिव्यं भ्रातृभ्यो वेदपूजितं शन
त्कुमारो भगवान् पुरा प्राह विचक्षणः २८ तद्वै गोप्यतरं राजन् मया ते वर्णितं महत् वक्तव्यं
रामभक्ताय त्वनन्याय युधिष्ठिर २९ श्रीरामधर्मं परमं पवीत्रं देवा न जानंति कुतो मनु

ष्या सर्वेषु दृष्टेषु यथा हि रत्नं सर्वेषु धर्मेषु तथा वरीष्ठं ३१ इति श्रीशनत्कुमारसंहितायां श्रीव्या
सयुधिष्ठिरसंवादे श्रीरामधनुर्वाणपरत्वे षष्ठोध्यायः ६ युधिष्ठिर उवाच भोजनेशनस्ना
ने मलमूत्रविसर्जने तुलसीमालिकां व्यास कथं वै धारयेत्सुधीः १ श्रीवेदव्यास उवाच गुरु
दत्तां तु या माला कंठलग्ना सुसंस्कृता तुलसीकाष्ठसंभूता न त्याज्या सा कदाचन २ तां त्यक्त्वा
तु महामूढो मिथ्याचारी प्रमादतः संस्कारं खंडितं कृत्वा गुरुद्रोही भवेन्नरः ३ प्रायश्चित्तं
तु पापस्य कर्तव्यं तस्य तेन वै न कृत्वा भ्रष्टतां याति परं प्राप्तिर्हि दुर्लभा ४ यथा यज्ञोपवी
तं तु न त्याज्यं ब्राह्मणैः क्षणे वैष्णवेन तथा माला न त्याज्या क्षणमेव च ५ मलं मूत्रं त्य
जन् कर्णे धारयेद्यज्ञसूत्रकं तथापि कंठलग्नं तत् ज्ञातव्यं पंडितेन वै ६ मलमूत्ररतो रोगी
खट्वायां प्रसृतः कुधीः लभेत्स तुलसीदैवात् मृतः स्वर्गमवाप्नुयात् ७ तन्मालादीक्षितो वि
द्वान् जानन्नपि कथं त्यजेत् भुंजति मालिकां त्यक्त्वा विष्णोरुच्छिष्टभोजनं ८ तुलसीद
लसंयुक्तमेतदज्ञस्य लक्षणं तुलसीस्पर्शजं त्यक्त्वा जलं स्नानं करोति यः ९ पावनं शु

चिनामूढः केन पूतो भवविष्यति स्नानाञ्जलं पतेत्पादौ भक्षिता कुत्र सा गता ९ तुलसीमा
लिकां त्यक्त्वा सुप्तो मरणमाप्नुयात् दैवात्स च हरेर्धाम कथं मूढो गमिष्यति १० तुलसी
संभवां मालामिति ज्ञानेन न त्यजेत् ११ युधिष्ठिर उवाच तप्तमुद्रा कथं प्रोक्ता लोकेस्मिन्
चापवाणयोः सीतला वै परे धाम्नि व्यास सर्वैस्तु सत्कृता १२ श्रीवेदव्यास उवाच तप्ता
हि मर्त्यलोकेस्मिन् प्रधानमुनिभिः कृताः श्रीरामस्याज्ञया मुद्रा मत्तस्तत्कारणं शृणु १३
लोकेस्मिन् भौतिका देहा जनानामलमुत्रजाः तप्तमुद्रांकिताः शुद्धास्ते भवंति क्षणांतरे
१४ योग्यता तु भवेत्तेषां तदा मंत्रस्य धारणे अन्यथा पेक्षितान्यत्र तपांसि विविधानि च १५
अथवा भास्मतां याति लोकवेदस्य वासना तप्ताभ्यां शरचापाभ्यां भवेन्मंत्रस्य योग्यता १६
यद्वा यमेन कालेन त्वग्राह्यो भवति क्षणात् तप्ताभ्यां शरचापाभ्यां मंकितो हरिवल्लभः १७
यद्वा पितृर्षिदेवानामृणं दग्धं करोति सः तप्ताभ्यां शरचापाभ्यां मंकितो यो भवेज्जनः १८ अ
थवा शीतलान्येव खंडितानि भवंत्युत ततस्तु शरचापाणामपराधी भवेज्जनः १९ अथ

१२

वाशीतलैश्चिन्हैरंकितो न भवेत् दृढः तप्तांकितो भवेत् ख्यातः लोके श्रीरामसेवकः २० तप्त
मुद्रांकितं दृष्ट्वा देवा बिभ्यति तेन वा विघ्नान्यन्यस्य कुर्वंति मुक्तिमार्गनिरोधकाः २१ यद्वा
देवभक्तानां राममार्गो ह्यपेक्षितः अस्य नापेक्षितः कश्चित् तस्मात्तप्तांकितो भवेत् २२
अथवा वह्निदग्धश्च ह्यस्वर्गी पुरुषो भवेत् आभ्यां तप्तमुद्राभ्यां स दोषो नश्यति नृणां २३
अथवा वह्निदाहश्च मृतस्य न भवेद्यदि तद्दोषो नश्यति द्वाभ्यामाभ्यां चैव नृणां महान् २४
अथवा पूर्वजास्तेषां वह्निदग्धाः क्वचिन्मृताः तप्तमुद्रांकितानां वै तेपि यांति परां गतिं २५ अ
थवा ह्यग्निहोत्रं वै न कृत्वा दोषमाप्नुयात् तप्तमुद्रांकितानां तु तद्दोषो नश्यति क्षणात् २६
अकालेपि मृतानां वा मार्गश्चैवार्चिरादिकः तप्तमुद्रांकितानां च सुलभो भवति भृशं २७ दे
वानां वा मुखं वह्निर्लोकसाक्षी च कथ्यते तप्तमुद्रांकितानां स साक्षी भवति भूतले २८ य
द्वागस्त्यो मुनिश्रेष्ठः पूर्वजन्मनि पावकः मुनिभिस्तन्मतं श्रुत्वा तप्तमुद्राः प्रवर्तिताः ।
२९ अग्निहोत्ररतानां वा मुनीनाममलात्मनां अग्निर्मान्यश्च सर्वेषां तस्मात्तप्ताः प्रवर्त्ति

१२

ताः ३ एवंबहुविधहेतुंकल्पयंतिकवीश्वराः रामस्यचापबाणानांतप्तमुद्रांप्रतिनृप ३१
अथवात्रैकव्रतांतंशृणुराजन्मनोरमं यंश्रुत्वातप्तमुद्रानांकारणंज्ञास्यसिवरं ३२ एकदामुनि
वृंदानांदीक्षेयंवैप्रवर्त्तिता तदाचापंचबाणास्तुस्वतस्तप्तौबभूवतुः ३३ शिष्याणांपाप
नाशार्थमेवंतप्ताप्रवर्त्तिताः एवंतुतप्तमुद्रानांमहात्म्यमतुलंशुभं ३४ शीतलाश्चापिशो
भार्थंग्राह्यास्त्याज्यानकेनवै मुद्राःश्रीरामचंद्रस्यमहापुण्याद्विधाःस्मृताः ३५ युधिष्ठिरउ
तिलकंचकथंधार्य्यंस्नानेचक्षौरकर्मणे एतन्मेसंशयंव्यासकृपयात्वंनिवृत्तय ३६ श्रीवे
दव्यासउवाच तिलकस्यनदोषःस्यात्वर्णयामिचतत्कथां भंगेसतिपुनर्धार्य्यंरामदी
क्षापरायणैः ३७ श्रीरामस्यपरेधाम्निशभायामेकदाकिल चापंप्रतिविवादंचचक्रेवै
कृतवान्हरेः ३८ अहंनैवनिकृष्टोस्मित्वत्तश्चापस्वतेजसा नधारयतिमांरामश्चैतदंतरम
स्तिवै ४० एवंतयोर्विवादंवैश्रुत्वारामोथपार्षदैः एकांतेललितांलीलांकृतवान्शस्त्र
वृंदतः ४१ लक्ष्यंनानाविधंकृत्वाभ्रातृभिःसहितोहनत् चापंवैप्रथमंग्रह्यशापकैरह

अत्रतेकथयिष्यामित्वितिहासंपुरातनं आश्चर्य्यरूपंगोप्यंचसर्वपापप्रणाशनं ॥३८॥ ४॥

नत्पुनः ४२ लक्ष्यान्वैरूप्यदीर्घांश्चकारयित्वा मुहुर्मुहुः बाणास्तेबहवः संति प्रयात्यायां
२३ तितत्रजान् हत्वाहत्वातुलक्ष्यान्वैपुनरारोपितान्पृथक् एवंतुरुचिरालीलासावभूवनि
रंतरा ४४ तदावकाशंवक्रस्यधारणेनवभूवह चक्रंतुदुःखितंदृष्ट्वारामोवचनमब्रवीत्
४५ अद्यावकाशंतप्राप्तंत्वयामद्धारणंप्रति लीलांचान्यदिनेकृत्वाआदौत्वांधारयाम्यहं ४६।
इत्युक्त्वावचनंतस्मैसोषयित्वारघूत्तमः रचयामासतांलीलांद्वितीयेदिवसेपुनः ४७ आ
दौचक्रंग्रहीत्वातत्प्रेरयामासलक्ष्यके तदावकाशंसंप्राप्यधनुःश्रीरामहस्तयोः ४८ आग
त्यशायकैःशार्द्धंहर्षितोभून्महामनाः एतस्मिन्नंतरेलक्ष्यंहत्वाहेतिःसमागतः ४९ रामे
वकाशमप्राप्यवभूतत्रसंस्थितः रामस्तदावहून्वान्प्रेरयित्वापुनःपुनः ५० हत्वावान्ल
क्ष्यान्वहून्चित्रान्कारयित्वामुहुर्मुहुः पुनरस्त्राण्यनेकानिव्यश्रजन्लक्ष्यकेषुवै ५१
योज्यप्रयोज्यबाणाग्रेबहुलीलांचकारह तदाहेतिर्व्यथांप्राप्यतेषांप्रचंडतेजसा ५२ रामस्य
चरणत्राणेआश्रितोभूद्भयात्तदा पुनःप्रव्यथितोभूत्वापादेचिन्होवभूवह ५३ तदाश्री। २३

१५

ईराः दैत्येयाश्चापिरक्षंतिमनुष्याणांतुकाकथा १९ धनुर्बाणांकितंदृष्ट्वाकिंकरत्वंप्रयांति
वै सर्वाण्यस्त्राणिशस्त्राणिरामचंद्रस्यशासनात् २० राक्षसाःसर्वलोकेषुविभीषणप
रायणाः धनुर्बाणांकितंदृष्ट्वाविघ्नंत्यक्त्वानमंतितं २१ हनुमानवायुरूपेणमर्त्यलोके
चरन्सदा धनुर्बाणांकितंदृष्ट्वारक्षतिसर्वशंकटात् २२ श्रीरामेणतृणात्तुच्छाज्जयं
तस्यमदोहतः तस्यैवशरचापाभ्यांकेनविघ्नंतिदेहिनः २३ जामदग्न्येःपरालोकारा
मबाणेननाशिताः तस्यबाणांकितंदृष्ट्वाननमेद्ब्राह्मणःकथं २४ शरेसंयोज्यचक्रा
स्त्रंवज्रास्त्रंरघुनंदनः अनंतचक्रवज्राभ्यांरिपूनहंतिक्षणांतरे २५ तस्यबाणांकितंकस्य
भयंभवतिभूतले नश्यंतिभयदातारोरामबाणांकितंजनं २६ यथावैरावणीशेनाराम
बाणैर्विनाशिताः तथैवतप्तमुद्राभिर्नश्यंतिमदनादयः २७ रामलोकंविष्णुलोकंचा
यमुद्राप्रदायिनी चक्रमुद्रांकितानांवैरामलोकोस्तिदुर्लभः २८ चक्रच्चापेयथा
धर्मोबाणेचवर्ततेधिकः तथैवचक्रमुद्रातस्तन्मुद्रायाःफलंमहत् २९ युधिष्ठिरउवा॰

१५

त्वा रघुश्रेष्ठः सहः सर्वैः शुभाजनैः शरक्रीडास्थलं गत्वा चापे बाणं नियोज्य च ८ चक्रा
स्त्रं योजयामास तस्मिन्बाणे महाप्रभुः व्यसृजत्शायकात्तस्मान्निसृतानि बहूनि
वै ९ चक्राणि चैव तीक्ष्णानि दृष्ट्वा तान्यब्रवीद्वचः ब्रह्मांडानां बहूनां च यूयं यातु ममा
ज्ञया १० रक्षणं मद्भक्तानां कर्तुं योग्या स तत्र वै इत्येवं दर्शयामास लीलां तु महाज्ञया
वाय च ११ अब्रवीत्ते महाशंभो वाक्यं सत्यं मया कृतं तदा महाप्रसन्नास्तु बभूवुः सर्व
पार्षदाः १२ श्रीवेदव्यास उवाच इति रामायुधानां त्वं संदेहं माकुरु नृप शनत्कुमार
वाक्येन भ्रातरस्तस्य तोषिताः १३ चक्रांकितजनानां वै चापमुद्गारपेक्षिताः चापबा
णांकितानां च चक्रचिह्नं विवर्जितं १४ चापबाणांकितं दृष्ट्वा यदि चक्रांकितो नमेत्
स लभेद्दुर्लभं पुण्यं विपरीतं तु पातकं १५ धनुर्बाणपरत्वं च पेशृण्वति पठंति वा चक्रं
तेषां सुरक्षार्थं सर्वकाले प्रवर्त्तते १६ रामचापांकितं दृष्ट्वा नमेत्कामो धनुर्द्धरः अन्यान्ज
नान्सदा काले समन्येन्निजकिंकरान् १७ नामोच्चारणमात्रेण रामो मुक्तिप्रदो भवेत्
धनुर्बाणांकितानां वै वशगो भवति सदा १८ धनुर्बाणांकितं दृष्ट्वा देवाः सर्वे धनु

मन् महाराजस्तां लीलां वै समाप्तवान् आगत्य स्वशभामध्ये शभ्यान् वचनमब्रवीत् ५४ स
र्वेषामस्त्रशस्त्राणां मत्तधनुर्वै विनायकः हेतिरपि च प्रेष्योस्य चाद्य प्रभृति निर्भयः ५५ व
सतु मत्शभामध्ये चापि प्रीतिं समावहन् ददाम्यन्यद्वरं किंचित्तुभ्यं शृणु सुदर्शन ५६ ये
न मद्भक्तरक्षा च तव कीर्तिर्भविष्यति मर्त्यलोके प्रयाहि त्वं स्वांशरूपेण तत्र च ५७ मद्भ
क्तानां तु तिलकं स्नाने च क्षौरकर्मणि यदा लुप्तं भवेद्भाले तदा विघ्नानि पापतः ५८ आगमि
ष्यंति दुःखार्थं तानि त्वं नाशयन्सदा तिष्ठ तत्र महाभाग लोकपूज्यो भविष्यसि ५९ श्री
वेदव्यास उवाच एवमुक्त्वा जगन्नाथः पुनस्तूष्णीं बभूव ह तदा ज्ञानमकरोद्धेतिः समयं प्राप्य
भारत ६० भगे तु तिलके ह्येवं राजन् दोषो न विद्यते सीतारामप्रपन्नानां रामचंद्रस्य शास
नात् ६१ युधिष्ठिर उवाच रामचापशराणां वै प्रेष्यतां चक्रमेव च कां करोति जगन्मध्ये
वेदव्यास वदस्व मे ६२ श्रीवेदव्यास उवाच श्रीरामस्याज्ञया हेतिर्मर्त्यलोके वशान्नृ
प यदार्चाविग्रहं रामं पूजयंति तु सज्जनाः ६३ धनुर्बाणधरं देवं तदा हेतिः सशंख

कः सर्वतोभ्रममाणश्च विघ्नकारान्निहंति वै ६४ शंखश्चार्घ्यादिकं कार्य्यं करोति सत
तं शुभं इति ते वर्णिता राजन् मया चक्रस्य प्रेष्यता ६५ धन्यानराधन्यतरं कुलं तत्र ये चि
न्हिता राघव चापबाणैः धन्या धराधारयति स्थितांस्तान् धन्या वयं रामकथासु रक्ताः ६६
इति श्रीशनत्कुमारसंहितायां श्रीव्यासयुधिष्ठिरसंवादे श्रीरामधनुर्बाणपरत्वे सप्तमो
ध्यायः ७ श्रीवेदव्यास उवाच एवं चक्रसमेतानां शस्त्रास्त्राणां युधिष्ठिर राजा श्रीराम
चंद्रस्य सर्वकाले महद्धनुः १ चक्रात्कोटिगुणं पुण्यं फलं चापस्य धारणे सबाणस्य
भुजाभ्यां वै निश्चितं लोकविश्रुतं २ युधिष्ठिर उवाच कथं कोटिगुणं पुण्यं चक्राच्चा
पस्य धारणे सबाणस्य मुनिश्रेष्ठ महात्म्यं ब्रूहि तत्वतः ३ श्रीवेदव्यास उवाच एकदा
तु महाशंभुस्तस्मिन्वाम्नि परे नृप श्रीरामस्य शरं चापस्तुवन् वचनमब्रवीत् ४ प्रे
रकं बाणवृंदानां रामचापमहं भजे चक्रानंतपतिं तीक्ष्णं रामबाणं नतोस्म्यहं ५ इति
श्रुत्वा तु तद्वाक्यं वासुदेवोब्रवीद्वचः तव वाक्यं महाशंभो कथं सत्यं भवेदिदं ६ महाशं
भुस्तदा नत्वा प्रार्थयामासुराघवं मम वाक्यं महाराज कथं सत्यं भवेद्ध्रुवं ७ एवं श्रु

चक्राच्चैवाधिकोधर्मो बाणेचापेत्वयामुने कथितस्तंकथंधर्मंजानामिकृपयावद ३० श्रीवे
दव्यासउवाच तवानुजोर्जुनोराजन्विराटनगरेवरे युद्धंचकौरवैःशार्द्धंगवार्थंकृतवा
न्यदा ३१ तदाचापस्यटंकारंपूर्वंकृत्वाभयंकरं आह्वायामासशत्रून्वैसावधाने
नचेसा ३२ पुनर्द्रोणस्यपादाब्जेद्वौबाणौव्यसृजद्बली गुरवेप्रणतिंकृत्वापुनर्युद्धंचका
रसः ३३ एवंयुद्धंरणेचक्रंनकरोतिकदाचन दुर्बलंसबलंशत्रुंरणेहंतिनहंतिवा ३४ ह
तवान्वालिनंरामोमृगयानत्स्वधर्मतः पशुंमत्वानृपश्रेष्ठोमीत्रकार्य्यार्थमच्युतः
३५ तत्रापिनाहरत्प्राणान्तद्बाणःशीघ्रतोरिपोः सोगदापवरंलब्ध्वारामान्मृत्युमवा
प्नुयात् ३६ हेतिर्हिनकरोत्येवंसूक्ष्माधर्मगतिर्नृप तापसंशब्दवेधीत्वाद्धत्वादशरथो
नृपः ३७ तत्रापितद्वचःश्रुत्वामात्रेपित्रेजलंददौ इत्येवमधिकोधर्मश्चक्राच्चापशरे
हरेः ३८ तस्यमुद्रामहात्म्यंवैत्वंजानीहिमहाधिकं दिव्यंधर्ममिदंवेदशास्त्रमुल्लंघ्य
वर्त्तते ३९ युधिष्ठिरउवाच दृष्ट्वारामायुधानांवैप्रभावंविविधंमुने प्रेष्यतांचगतोहे

तिरंकितोनकथंह्यभूत् ४० श्रीवेदव्यासउवाच शृणुराजन्महापुण्यांकथांकौतुहल
प्रदां प्रेष्यभावंगतोहेतिरामचापेयदानघ ४१ तदारामंप्रतिप्राहपुनर्हेतिःप्रहर्षितः
१९ कुरुमामपिराजेंद्रतवचापसरांकिते ४२ अंकितानांचसर्वेषामधिकत्वेनराघव तमु
वाचततोरामशृणुष्ववचनंमम ४३ सुरासुरनराःसूरारथारोहारनेकशः विश्वमध्यभ
विष्यंतिबलिनस्तुयुगेयुगे ४४ मच्चापशररूपाणिशरचापाणिहस्तयोः तेषांचैवभ
विष्यंतित्वद्रूपाणितदाशृणु ४५ रथेषुरथचक्राणिद्वंद्वानिसुदृढानिच महांतितुभं
विष्यंतिह्येवंत्वंधारयिष्यसि ४६ ममैवचापबाणानवैप्रेम्णानित्यंनसंशयः इतिश्रु
त्वातुतद्वाक्येहेतिर्वचनमब्रवीत् ४७ देवदेवकृपासिंधोत्वद्वाक्याद्धर्षितोस्म्यहं प्रार्थया
मिपुनर्नाथदेहिमेवरमुत्तमं ४८ धनुर्बाणधरंनित्यंत्वांयथाधारयाम्यहं तदोवाचरघु
श्रेष्ठस्त्यजचिंतांमनोगतां ४९ धनुर्बाणधरस्तत्रस्थास्यामिसूर्यमंडले चक्राकारंर १९
विंकृत्वाह्येकचक्ररथंतथा ५० नित्यंतत्कीर्णबाणौघैर्नाशयन्जगतांतमः पादा

ज्ञेशंखचक्राभ्यांद्विचिन्हाभ्यांसमन्वितं ५१ यजिष्यंतिजनास्तत्रनाम्नानारायणंहिमां य
दाप्रादुर्भविष्यामिभूमौचनृपतेर्गृहे ५२ तदाहंनिहनिष्यामिरथस्थोरावणंरणे श्रीवेदव्या
सउवाच एवंज्ञात्वातुमेधावीचापबाणांकितोनरः ५३ तेषामुपरिचक्रांकंनधारयतिपांड
व चापमुद्रातुयोग्यास्यात्चक्रमुद्रोपरिभृशं ५४ अयोध्यापीहकौरव्यचक्रस्योपरिसं
स्थिता सख्युंधनुषाकारांधारयतिमहानंदी ५५ वेदानांचधनुर्वेदश्चक्रवेदोनविद्यते
आयुधानामितिश्रेष्ठंरामस्यधनुरुत्तमं ५६ त्यजतिचक्रिणंचक्रंचक्रीचक्रंतथात्यजे
त् युद्धभूमौततोरामोनधारयतिचक्रकं ५७ चापंकरोतिसत्कारंशरंत्यक्त्वाशरस्यच श
त्रोर्मुमुक्षोःरामस्यतस्माद्रामोधनुर्द्धरः ५८ आदौनत्वारिपुंचापंपुनर्दंडंददातिच य
थारामोसमुद्रंवैतस्माद्रामेणधारितं ५९ त्यक्त्वाबाणंपुनस्तंवैआह्वयन्रामसन्मुखे
धनुरायातिश्रीघ्रंवैतस्माद्रामस्यतत्प्रियं ६० धनुर्वेदेधनुर्विद्यासर्वोत्कृष्टाप्रकीर्त्ति
ता आयुधानांधनुःश्रेष्ठमितिजानंतिपंडिताः ६१ एकंप्रतिगदायुधंचक्रयुद्धंतथै

कु १

वच वाणयुद्धेन सूरा वै तोषं यांति ह्यनेकशः ६२ कृतं प्रतिकृतं कुर्य्याद्धर्मयुद्धं यदुच्यते त
द्युधं चक्रवज्राभ्यां रामो न मन्यते वरं ६३ सीतारामप्रपन्नेभ्यरिदं शास्त्रं हि यो वदेत् श
तकोटिगवां पुण्यं सलभेन्नात्र संशयः ६४ इमं शास्त्रं नरः श्रुत्वा चान्यं न मन्यते वरं तस्मा
दतिभयाल्लोके ख्यातं न कविभिः कृतं ६५ सीतारामविहीनाय निंदकाय शठाय च ।
इमं धर्मं त्वया साधो न वक्तव्यं कदाचन ६६ इदं धर्मं कृणात् पुंसां रामधामददाति वै इत
रेषां चैव लोकानां सुखानां तत्र का कथा ६७ कौशल्यायाः पुत्ररत्नं भजेहं शस्त्राणां वै चा
पवाणान् प्रणम्य एताभ्यां मां व्यासमुख्यं वदंति लोकाः सर्वे ज्ञानवैराग्ययुक्ताः ६८ वे
दानां वै सामवेदः प्रसस्तः रूपाणां यद्रामरूपं परं तत् तीर्थानां वै जान्हवी रामगंगा धर्मा
णां वै धर्मतत्पुनीतं ६९ सीतासमेतरघुवंशकेतुं राजीवनेत्रं रमणीयगात्रं धनुर्द्धरध
र्मभृतां निसेव्यं शिष्यैर्व्रतोहं शरणं व्रजामि ७० इति श्रीशनत्कुमारसंहितायां श्री
व्यासयुधिष्ठिरसंवादे श्रीरामधनुर्बाणपरत्वेऽष्टमोध्यायः ८ ॥ श्रीसीतारामाय नमः ।

6/53